International Journal of Research in Economics and Social Sciences(IJRESS)
Available online at: http://euroasiapub.org
Vol. 13 Issue 4, April- 2023
ISSN(o): 2249-7382 | Impact Factor: 8.018
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

# व्याकरणशास्त्रे सृष्टिविषयको विचार:

- प्रो.धनीन्द्रकुमारझा:
आचार्य:, व्याकरणविभाग:
केन्द्रीयसंस्कृतविश्वविद्यालय:
लखनऊपरिसर:, लखनऊ

"ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च"[1], "ब्राह्मणेनावश्यं शब्दा ज्ञेयाः"[2] इत्यादिविधिवचनैः शब्दराशिरूपशडङ्गवेदाध्ययनज्ञानस्य ब्राह्मणानां नित्यकर्तव्यता सिद्धा। शब्दज्ञानमन्तरेण ब्राह्मणकर्मणाम् अध्ययनाध्यापनयजनयाजनादीनामसम्भवात्। शब्दा ज्ञातव्या इत्यस्य शब्दसाधुत्वज्ञानं कर्तव्यमित्यर्थः। साधुत्वज्ञानञ्च व्याकरणाधीनम्। यथोक्तं भर्तृहरिणा-

अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम्।3

तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते।।

अत एव महोपकारकत्वात् वेदानां व्याकरणस्य षट्स्वङ्गेषु प्राधान्यमाख्यातम्। यथोक्तं महाभाष्यकारैः- "प्रधानञ्च षट्स्वङ्गेषु व्याकरणम्। प्रधाने च कृतो फलवान् भवति"[4] भर्तृहरिणाप्युक्तम्-

आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः।[5]

प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः।।

व्याकरणेषु नानाविधेषु ऐन्द्रकाशकृत्स्नापिशलादिषु लोकप्रसिद्धेषु पाणिनीयं व्याकरणं स्वगुणैः विचित्ररचनाशैलीप्रयोगैः लौकिकवैदिकोभयविधसकलशब्दराशिव्युत्पादन-लाघवलब्धकौषलैः प्रसिद्धतमं ग्राह्यतमं पवित्रतमञ्च जातम्। तदेवेदानीं प्रायः सर्वैः पठ्यते पाठ्यते च।

International Journal of Research in Economics and Social Sciences(IJRESS)
Available online at: http://euroasiapub.org
Vol. 13 Issue 4, April- 2023
ISSN(o): 2249-7382 | Impact Factor: 8.018
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

अत एव लघुशब्देन्दुशेखरकारैः श्रीनागोजिभट्टैः सम्प्रति पाणिनीयव्याकरणस्यैव वेदाङ्गत्वं स्वीकृतम्। एतदेव व्याकरणं कात्यायनपतञ्जलिभ्यां वार्तिकभाष्यकाराभ्यां महतादरेण गृहीतं संवर्धितञ्च एतदेव व्याकरणमाश्रित्य भर्तृहरिकैयटहरदत्तहरिदीक्षितभट्टोजिदीक्षितनागेशादयः महाविद्वांसो महाबुद्धिप्रतिभाशालिनः स्वस्वव्याख्यानैरद्भुतैः पाणिनीयार्थं प्रकाशयद्भिः परमां ख्यातिमुपजग्मुः। प्रकाशते चेदमद्यापि संस्कृतभाषामहाशब्दौघम्। व्याकरणेन साधूनां शब्दानां ज्ञानं भवति। साधवः शब्दा अर्थबोधका धर्मजनकाश्च भवन्ति। असाधवश्चार्थबोधका अधर्मसाधनाश्च भवन्ति। यथोक्तं हरिणा-

“धर्मे च प्रत्यये चाङ्गं सम्बन्धाः साध्वसाधुषु6, इति।

शास्त्रपूर्वके प्रयोगे धर्मस्तत्तुल्यं वेदशब्देन7।। " इति महाभाष्येऽप्युक्तम्।

एवञ्चेदं व्याकरणं धर्मसाधनमर्थबोधकं प्रकृतिप्रत्ययस्वरागमवर्णविकारविपर्ययादि-बोधनैर्वेदस्य रक्षकं प्रथमं वेदाङ्गं प्रथममेव ब्राह्मणैः किं वा संस्कृतज्ञानाय जनैरध्येयमादरणीयं नोपेक्ष्यमिति स्थितम्।

अत्रेदं संक्षेपेण शब्दानां स्वरूप विषये विचार्यते।

तत्र वैयाकरणाः शब्दनित्यत्वं स्वीकुर्वन्ति। सिद्धे शब्दार्थसम्बन्धे8 इति वार्तिके भाष्ये कैयटे च व्युत्पादितम्।

स च नित्यः शब्दः स्फोटरूपो न ध्वनिरूपः। ध्वनीनामाशुविनाशित्वात् न नित्यत्वम्।

उक्तञ्च ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते अल्पो महांश्चोत्थापिता भाष्यकृता। हरिणाप्युक्तम्-

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्[9]।

विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।। इति।

तथा चैकः स्फोट एव शब्दोऽर्थवाचको ब्रह्मरूपोऽनादिनिधनः सर्वजगदभिन्ननिमित्तोपादानहेतुरिति। ध्वनिस्तु अल्पत्वहृस्वत्वदीर्घत्वादिसकलवर्णपद-वाक्यधर्मयुक्तः स्फोटग्राहकः स्फोटे

International Journal of Research in Economics and Social Sciences(IJRESS)
Available online at: http://euroasiapub.org
Vol. 13 Issue 4, April- 2023
ISSN(o): 2249-7382 | Impact Factor: 8.018
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

स्वप्रतिबिम्बितस्तदुपादानोऽनेको भिन्नः कण्ठताल्वाद्यभिकृतवायुव्यञ्जितः कर्णोपलब्धिरुत्पदविनाशशाली उच्यते। न च ध्वनिना स्फोटे एकस्मिन्न परमार्थतो भेदः कर्तुं शक्यते। ध्वनिरूपरुषिताभिव्यक्तस्फोटेन वाचकेन शक्त्याश्रयेण ध्वनिभेदारोपितभेदेनतत्तदर्थावगतिरिति सिद्धम्। तदा कीदृशं व्याकरणमिति जिज्ञासायां प्रथमं तावद् व्याकरणपदार्थो विचार्यते। व्याक्रियन्तेऽसाधुशब्देभ्यः साधुशब्दाः पृथक्क्रियन्ते विविच्य ज्ञाप्यन्ते येन तद् व्याकरणमिति व्युत्पत्त्या भाषाया अस्तित्वनिबन्धनः साधुशब्दाभिव्यञ्जको नियम विशेषो व्याकरणपदार्थ इति लभ्यते।

व्याकरणस्य शास्त्रत्वं दर्शनत्वञ्च।

शिष्यते हितमुपदिष्यतेऽनेन तच्छास्त्रमिति योगशक्तिसहकृतया रूढिशक्त्या धर्मार्थकाममोक्षाख्य-पुरुषार्थचतुष्टयरूपहितस्य ज्ञापको वाक्यविशेषः शास्त्रमिति स्वीकारात्। व्याकरणस्य शास्त्रत्वमुक्तं महाभाष्ये भगवता पतञ्जलिना "शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यमिति।[10]"

व्याकरणस्य दर्शनत्वम्-

दृश्यते धर्मार्थादिबोधनपुरस्सरमात्मतत्त्वं बोध्यते येन तद् दर्शनम्।

काणादं गौतमञ्चैव मीमांसाद्वयमेव च।

आहु साङ्ख्यञ्च योगञ्च षट् शास्त्राणि मनीषिणः।।

गौतमस्य कणादस्य कपिलस्य पतञ्जलेः

व्यासस्य जैमिनेश्चापि षडेव दर्शनानि हि।।[11]

इति प्रसिद्धोक्त्या साङ्ख्ययोगन्यायवैशेषिकमीमांसावेदान्तनाम्ना षडेव दर्शनानि शास्त्राणि च प्रसिद्धानि शास्त्रज्ञानां दार्शनिकानां च समाजे। शास्त्रज्ञाः षड् नास्तिकदर्शनान्यपि स्वीकुर्वन्ति चार्वाकजैनचतुर्विधबौद्धदर्शनभेदेन च। एतेषां दर्शनानामेव आगम-दर्शन-शास्त्र- स्मृति-तन्त्रतीर्थशब्दैरपि

व्यवहारो दृश्यते। यद्यपि सर्वसिद्धान्तसङ्ग्रहे भगवता शङ्कराचार्येण षड्दर्शनसङ्ग्रहे जिनदत्ताचार्येण च आस्तिकदर्शनविचारचर्चायां व्याकरणस्य दर्शनत्वेन चर्चा न कृता। तथापि सर्वतन्त्रस्वतन्त्राः दार्शनिकशिरोमणयः श्रीमाधवाचार्याः स्वकीये सर्वदर्शनसङ्ग्रहे व्याकरणस्य दर्शनत्वं स्वीकुर्वन्त्येव। "प्रथमचरमतयाल्पार्धकतिपयनेमाश्च"[12] इति सूत्रे "सर्ववेदपारिषदं हीदं व्याकरणशास्त्रमिति"[13], वचनेन भगवता पतञ्जलिना पुनश्चापि अस्य शास्त्रत्वं स्वीकृतमेव। महावैयाकरणेन आचार्य भर्तृहरिणा तु स्वकीये वाक्यपदीयग्रथे व्याकरणस्य शास्त्रत्वं दर्शनत्वं स्मृतित्वम् आगमत्वञ्च बहुवारं प्रत्यपादि।

प्रकारान्तरेणापि विचार्यते यत् शास्त्रज्ञाः तदेव दर्शनपदेन व्यवहरन्ति यत्र मोक्षः मोक्षोपायः आत्मस्वरूपं ब्रह्मस्वरूपं जगदुत्पत्यादिविशयको विचारो दृश्यते तद्दर्शनमिति। तया रीत्या व्याकरणेऽपि एतेषां भूयान् विचारो वर्तते यथा वाक्यपदीये व्याकरणस्य दर्शनत्वप्रतिपादने हरिणा व्याहृतम्-

आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः।[14]
प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः।।

अनया कारिकया व्याकरणस्य ब्रह्मपरत्वं बोध्यते। इह तु स्फोटाख्यं ब्रह्मविवक्षितम्। स च स्फोटः अनादिनिधनः जगद्रूपविवर्ताधिष्ठानतया स्वीक्रियते। तथा च अन्यस्यां कारिकायाम्-

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।[15]

इत्यत्र तादृशस्फोटब्रह्मनिरूपणाद् यथा वेदान्तादिप्रभृतिशास्त्राणां ब्रह्मपरतया दर्शनत्वं स्वीकृतं विपश्चिदपश्चिमैः तथैव व्याकरणस्यापि दर्शनत्वम् उररीकर्तव्यम्। अन्यदपि प्रमाणम्- महाभाष्ये द्वितीयाह्के - "अथ किमर्थं वर्णानामुपदेशः क्रियते" इत्युपक्रम्य भगवन्तः पतञ्जलयः-

वर्णज्ञानं वाग्विषयो यत्र च ब्रह्म वर्तते।

International Journal of Research in Economics and Social Sciences(IJRESS)
Available online at: http://euroasiapub.org
Vol. 13 Issue 4, April- 2023
ISSN(o): 2249-7382 | Impact Factor: 8.018
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

**तदर्थमिष्टबुद्धर्थं लघ्वर्थं चोपदिश्यते।।[16]**

**अस्यैव व्याख्याने- सोऽयमक्षरसमाम्नायः पुष्पितः फलितश्चन्द्रतारकत्वप्रतिमण्डितो वेदितव्यो ब्रह्मराशिः, सर्ववेदपुण्यफलावाप्तिचास्य ज्ञाने भवति, माता पितरौ चास्य स्वर्गे लोके च महीयेते।[17] अनेन उद्धरणेन यथा व्याकरणदर्शनस्य लोकोपयोगित्वं परमार्थसाधकत्वञ्च मनीषिभिः स्वीकृतम् तथा तु न अन्येषां दर्शनानामिति।**

**व्याकरणशास्त्रस्य दर्शनशास्त्रत्वेन प्रतिष्ठापनानन्तरम् व्याकरणमते जगदुत्पत्तिः विमृश्यते। प्रायेण इदं निश्चप्रचमेव वर्तते, यद् जगदुत्पत्तिविषये वैयाकरणाः वेदान्तमतस्यैव आश्रयणं कुर्वन्ति। यथा वेदान्तदर्शने 'अथातो ब्रह्मजिज्ञासा' इत्युपक्रम्य 'जन्माद्यस्य यतः' इति द्वितीये सूत्रे जगतः प्रादुर्भावः तस्माद् परब्रह्मणः जायते। तथैव महावैयाकरणभर्तृहरेः वाक्यपदीये ऽपि 'प्रक्रिया जगतो यतः' इति कारिकांशेन तस्माद् शब्दब्रह्मणः जगतः प्रादुर्भावो भवति।**

**वैयाकरणसम्प्रदाये आचार्यभर्तृहरिप्रणीतवाक्यपदीयमूलग्रन्थस्य महामहोपाध्याय पं. द्रव्येशझा महाशयानाम् एवञ्च परमगुरुचरणानां सर्वतन्त्रस्वतन्त्राणाम् आचार्यरघुनाथशर्मणां वाक्यपदीयटीकानन्तरं प्रायेण वैयाकरणा वेदान्तिनः समभवन् इति प्रवादोऽपि प्रसिद्धिम् अगमत्।**

**सर्वप्रथमं सृष्टिशब्दार्थो विचार्यते -**

**सृष्टिशब्दः तौदादिक विसर्गार्थक सृज् धातोः कर्मणि क्तिन्प्रत्यये सति निष्पद्यते। यद्यपि अत्र भावे-करणे-कर्मणि च प्रत्ययः सम्भाव्यते। सर्जनम् सृष्टिः, सृज्यते अनयेति सृष्टिः, सृज्यते या सा सृष्टिः। तथापि कर्मसाधनमेवावगन्तव्यमत्र। सृज्यते या सा सृष्टिः इयं सृष्टि दृश्यप्रपञ्चपरम्। प्रकर्षेण प्रथमतो वा क्रिया प्रक्रियाप्रशब्दमहिम्ना अत्र सर्जन-पालन-लयानां ग्रहणं भवतीति परमगुरवः सर्वतन्त्रस्वतन्त्राः परापराज्ञाः विदितवेदितव्याः अम्बाकर्त्रीव्याख्याकाराः स्वनामधन्याः। प्रख्यातयशसाः आचार्यरघुनाथशर्माणः।**

**सृष्टिविषयेमुनित्रययमतमालोच्यते- अर्थवदधातुरप्रत्ययः प्रातिपदिकम्[18] अत्र पदं पदं प्रति इति प्रतिपदम्, प्रतिपदमर्हतीति प्रातिपदिकमिति व्युत्पत्त्या सर्वस्थानस्थितत्वात् शब्दस्य व्यापकत्वरूपोऽर्थः समागच्छति। अधातुरिति पदस्य धातुरिति सर्वशब्दप्रकृतिरूपः (सर्वं हि नामधातुजमाह) धातुः अविद्यमानो यत्र इति व्युत्पत्त्या एवञ्च अप्रत्यय इत्यस्य अविद्यमानः प्रत्ययः यत्र इति व्युत्पत्त्या च अधातु - अप्रत्ययपदाभ्यां प्रकृतिप्रत्ययविभगशून्यं संहृतक्रमरूपत्वम् अपरिच्छिन्नत्वञ्च शब्दब्रह्मण इति सूच्यते। एवञ्च अर्थवदिति पदेन घटपटाद्यर्थरूपवत्वं सूच्यते।**

**एतादृशेन व्याख्यानेन प्रतिभाति यत् महर्षिपाणिनेः इदं सूत्रं पूर्वापरीभावशून्यस्य अपरिच्छिन्नस्य अर्थवानिति शब्दस्याशयो ब्रह्मणा सह युज्यते। तदेव शब्दब्रह्म इति पदव्यपदेश्यमपि वर्तते। पुनश्च अर्थवदित्यत्र अर्थ इति पदेन शक्तिरवगम्यते। मतुप् प्रत्ययमहिम्ना ब्रह्मणि शक्तिमत्वं चागच्छति। तथा च शक्तिमद् ब्रह्मैव सृष्टिं व्याकरोति एतादृशः निष्कर्षः प्रतिफलति। अत्र केचन वैयाकरणाः शक्तिमत्वमर्थवत्वमित्यपि स्वीकुर्वन्ति।**

**अनेनैव प्रकारेण 'कृत्तद्धितसमासाश्च'[19] इति सूत्रेणापि कल्पितव्युत्पत्त्या शब्दब्रह्मणि कर्तृत्वं पालकत्वं संहारकत्वञ्च अभिव्यञ्ज्यते।**

**यथा करोतीति कृदित्यनेन जगत्स्रष्टृत्वम्, तस्मादुत्पन्नाय जगते हितस्तद्धित इत्यनेन रक्षकत्वम्, समसनं संक्षेपीकरणमिति समासेन संहारशक्तिमत्त्वमिति। तथा चैवं भूतस्य नित्यस्य शब्दब्रह्मणः प्रतिमारूपो वेदो यस्याङ्गभूतमिदं व्याकरणं कल्पितप्रकृतिप्रत्ययविभागाभ्यां तत्तदर्थविभागं जनयति। अत एवात्र नामरूपात्मकस्य जगतोऽपारमार्थिकव्यवहारा अपि लोकवद्दर्शिताः। अर्थाल्लोके यथा कलहस्तदनन्तरञ्च सन्धिस्तथैव व्याकरणेऽपि पूर्वं विगृह्य पश्चाच्च सन्धिर्विधीयते। समासव्यासादिश्चापि व्यवहाराः समुपलभ्यन्ते। 'पृषोदरादीनि यथोपदिष्टम्'[20] इति सूत्रेऽपि यथोपदिष्टशब्दस्य साधुत्वाभिज्ञानेन 'लुपि**

International Journal of Research in Economics and Social Sciences(IJRESS)
Available online at: http://euroasiapub.org
Vol. 13 Issue 4, April- 2023
ISSN(o): 2249-7382 | Impact Factor: 8.018
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

युक्तवद् व्यक्तिवचने'[21], 'तदशिष्यं संज्ञाप्रमाणत्वात्'[22] इति सूत्रेण सूत्रकृतोक्ताभिप्राये समादरो दर्शितः।

महर्षिकात्यायनो महर्षिपतञ्जलिश्चापि षब्दार्थसम्बन्धस्य नित्यत्वं स्वीकुरूतः। शब्दानां नित्यत्वानित्यत्वपक्षावपि स्तः। तत्रासत्योपाध्यवच्छिन्न एव शब्दोऽनित्यः। असत्योपाध्यनवच्छिन्नः शब्दो नित्यः। स एव ब्रह्मापरनामधेयः।

चत्वारि शृङ्गास्त्रयो अस्य पादा द्वे शीर्ष सप्तहस्तासो अस्य। त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्या आविशेष।।[23]

इति प्रयोजनव्याख्यानावसरे महता देवेन नः साम्यं यथा स्यादिति कथनेन स्वतः प्रकाशेन शब्दब्रह्मणा नः साम्यमित्यभिप्रायो लभ्यते। ब्रह्मविद् ब्रह्मैव भवतीति रीत्या शब्दविदामपि शब्दब्रह्मसाम्यं यथा स्यादित्यभिप्रायः। वार्त्तिककृतापि 'सिद्धे शब्दार्थसम्बन्धे'[24], 'सिद्धन्तु नित्यशब्दत्वात्' इति वार्त्तिकाभ्यां 'संग्रहे तावत्प्राधान्येन परीक्षितं नित्येषु शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यम्' इति व्याख्यातम्।

इदानीं प्रकृतिमनुरामः सृष्टिप्रक्रियाविमर्शः इति विशये यथामति किञ्चिद् विचार्यते। यथा अन्येषु दर्शनेषु न्यायादिषु परमाण्वादिभ्यः जगतः सृष्टि स्वीक्रियते, तथैव व्याकरणदर्शनेऽपि शब्दतत्त्वादेव जगतः सृष्टिः स्वीक्रियते

प्रमाणभूताः श्रुतयः-

"वागेव विश्वा भुवनानि यज्ञे वाच इत्सर्वममृतं यच्च मर्त्यम्" अन्यच्च-

"वाच्येव विश्वं बहुरूपं निबद्धं तदेतदेकं प्रविभज्योपभुङ्क्ते।"[25] इत्याद्याः।

शब्दमूलकसृष्टिविषये भगवता बादरायणेनापि देवताधिकरणे ब्रह्मसूत्रे "शब्द इति चेन्नातः प्रभवातप्रत्यक्षानुमानाभ्याम्"[26] अनेन सूत्रेण जगतः सृष्टिः शब्दमूलिका स्वीक्रियते। तत्रैव स्वानुभवं प्रकटयन्तः सन्तः विलसन्तः भगवन्तः शङ्कराचार्याः ब्रह्मसूत्रव्याख्याने लिखन्ति-अत एव

International Journal of Research in Economics and Social Sciences(IJRESS)
Available online at: http://euroasiapub.org
Vol. 13 Issue 4, April- 2023
ISSN(o): 2249-7382 | Impact Factor: 8.018
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

वैदिकाच्छब्दाद्देवादिकं प्रभवीति। अग्रे ऽपि - तथान्यत्रापि "स मनसा वाचं मिथुनं समभवत" (वृ.उ.) इत्यादिना तत्र तत्र शब्दमूलिका सृष्टिः श्राव्यते। स्मृतिरपि-

"अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा।[27]

आदौ वेदमयी दिव्या यतः सर्वा प्रवृत्तयः।"

तथा च श्रुतिः- स भूरिरिति व्याहरत् स भूमिमसृजत्[28] (तै .ब्रा.) तस्मिन्नेव शाङ्करभाष्ये इयं सृष्टिः स्फोटेन वर्णेन वेति पक्षद्वयं विचारितम्। तत्र स्फोटपक्षं निराकृत्य वर्णेन इयं सृष्टिः स्वीकृता वर्तते।

यद्यपि वैयाकरणाः जगतः उपादानकारणत्वं शब्दस्य मन्यन्ते, तथा तु न तत्र श्रीमद्भिः शङ्कराचार्यैः स्वीकृतं तैस्तु जगतः निमित्तकारणत्वं शब्दस्य स्वीकृतम् इति तु अन्यदीयाचर्चा।

श्रीभर्तृहरिणा अनया कारिकाया स्पष्टमेव संसारस्य शब्दशक्तिनिबद्धत्वम्, तदुपादानकत्वञ्चोक्तम्।

"षड्जादिभेद शब्देन व्याख्यातोरुष्यते यतः। तस्मादर्थविधाः सर्वाः शब्दमात्रासु मिश्रिताः।।"[29]

अस्याशयः-यथा षड्ज-ऋषभ - गान्धार-मध्यम- पंचम - धैवत-निशाद स्वराणां भेदाः शब्देन प्रतिपादिताः वर्तन्ते। तथैवानेन इदं निश्चीयते यत् समस्ता खल्वर्थाः तद्भेदाश्च शब्दादेव जायन्ते इति सुदृढम्।

तत्र वैयाकरणमते कीदृशी सृष्टिप्रक्रिया इति विषये महावैयाकरणभर्तृहरेः मतानुसारं तत्वमूलं प्रस्यूते। यतो हि अयमेव मुनित्रायान्तरं व्याकरणस्य प्रामाणिकः आचार्योः वर्तते तथा च व्याकरणशास्त्रस्य दर्शनकोटौ स्थापनमपि अयमेव भतृहरि अकरोत यथा-

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्। विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।

एव जगत उपादान कारणम्। तच्च उत्पादविनाशरहितः पूर्वापरीभावशून्य उपसंहृतक्रमश्च शब्द शब्दतत्त्वमपरिच्छिन्ना सर्वतः संहतक्रमा ग्राहयग्राहकत्वशक्तिरहिता पश्यन्ती वागेव ब्रहमा। तदेवाविद्यालक्षणान्तःपश्यदवस्थया संश्लिष्टं ज्ञेयशून्यं चिन्मात्रं जीवः। विवर्तस्तु अतात्त्विकोऽन्यथाभावः

**यथा शुक्ताविदं रजतमिति। सतात्त्विकोऽन्यथाभावः इति परिणामः यथा- पयो दधि भवति।**

**नागेशमतेऽपि स्फुटत्यर्थोऽस्मादिदिति व्युत्पत्त्या शब्दतत्त्वमेव ब्रड्मा। तस्मादेव नामार्थ रूपस्य जगतः सृष्टिः। तत्क्रमश्चेत्थम्-महाप्रलयकाले सर्वेषां प्राणिनां सर्वकर्मामुपभोगेन क्षयः। ततश्च भुक्तभोग्यानां। प्राणिनां मायायां लयः, मायायाश्चेश्चरे लयः। लयश्च नात्यन्तिको नाशः उत्तरसर्गोपपत्यवरोधात्। तथा चापृथग्भूतानामात्मन्यध्य- स्तानामाकाशादीनां यो हि शुद्धे ब्रह्मणि लयः स च न मृदि घटवदनुपलब्धिरूपः किन्तु रज्जौ सर्पस्येव प्रतिभाति। तस्यामवस्थायां माया सुप्तेव तिष्ठति, कार्याजनकत्वात्। कार्यस्यानत्पत्तेर्लयस्य स्वापसादृश्यम्। ततोऽपरिपक्वप्राणिकर्मभिः कालवशाल्लब्धपरिपाकैः फलप्रदानाये शअ अचरस्याविद्यापूर्विका सृष्टिर्मायापुरूषरूपेण जायते। ततश्च मायासंलितस्य परमेश्वरस्य-तदैक्षत बहुस्याम प्रजायेयम एकोऽहं बहुस्याम् इदानीं स्रष्टव्यम् इति सिसृक्षामिका बुद्धिर्जायते। ततस्त्रिगुणात्मकमव्यक्तं बिन्दुरूपं शक्तितत्वमाविर्भवति। ततस्त्रिगुणात्मकस्य बिन्दोरचिदंशो बीजम्। चिदशो बिन्दुः। चिदचिन्मश्रोंऽशो नादः। तत्राचिदंशः शब्दार्थोभयसंस्काररूपाऽविद्या। अस्मादेव गुणत्रयात्मकाद् बिन्दोवर्णविशेषरहितं ज्ञानप्रधानं सृष्ट्युपयोग्यवस्थाविशेषरूपं चेतनमिश्रं नादमात्रामुत्पद्यते। एतदेव जगदुपादानम् अपरा इत्युच्यते। ज्ञातस्यार्थस्य प्रकाशेच्छया प्रवृत्तस्य, इच्छया जातप्रत्यायने योगः इति शम्।**

**सन्दर्भग्रन्थसूची**:-

1. **महाभाष्ये पश्पशाह्नि‍के**, **पृष्ठ** 25

2. **महाभाष्ये पश्पशाह्नि‍के**, **पृष्ठ** 26

3. **वाक्यपदीये ब्रह्मकाण्डे कारिका**-1, **पृष्ठ** 34

4. **महाभाष्ये पश्पशाह्नि‍के**, **पृष्ठ** 25

International Journal of Research in Economics and Social Sciences(IJRESS)
Available online at: http://euroasiapub.org
Vol. 13 Issue 4, April- 2023
ISSN(o): 2249-7382 | Impact Factor: 8.018
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

5. **वाक्यपदीये ब्रह्मकाण्डे कारिका**-1, **पृष्ठ** 30

6. **वाक्यपदीये ब्रह्मकाण्डे कारिका**-1, **पृष्ठ** 52

7. **महाभाष्ये पश्पशाह्निके**, **पृष्ठ** 113

8. **महाभाष्ये पश्पशाह्निके**, **पृष्ठ** 76

9. **वाक्यपदीये ब्रह्मकाण्डे**, **पृष्ठ** 01

10. **महाभाष्ये पश्पशाह्निके**, **पृष्ठ** 05

11. **सर्वदर्शनसङ्ग्रहभूमिकायाम्**

12. **अष्टाध्यायां सूत्र सं**. 01/01/33

13. **महाभाष्ये**, 01/01/57

14. **वाक्यपदीये**, **पृष्ठ** 30

15. **वाक्यपदीये**, **पृष्ठ**- 01

16. **महाभाष्ये पश्पशाह्निके**, 1.1.2

17. **लघुशब्देन्दुशेखरे संज्ञाप्रकरणे**

18. **अष्टाध्यायी सू.सं**. 01/02/146

19. **अष्टाध्यायी**, **सूत्र सं**. 01/02/46

20. **अष्टाध्यायी**, **सूत्र सं**. 06/03/108

21. **अष्टाध्यायी**, **सूत्र सं**. 01/02/51

22. **अष्टाध्यायी**, **सूत्र सं**. 01/02/53

23. **महाभाष्ये पश्पशाह्निके**, **पृष्ठ**- 45

**International Journal of Research in Economics and Social Sciences(IJRESS)**
Available online at: http://euroasiapub.org
Vol. 13 Issue 4, April- 2023
ISSN(o): 2249-7382 | Impact Factor: 8.018
**(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)**

24. **महाभाष्ये पशपशाह्नि के, पृष्ठ**- 76
25. **ऋग्वेदे**
26. **ब्रह्मसूत्रे**
27. **महाभारते शान्तिपर्वाणि** 231/56
28. **तैत्तरीयब्राह्मणे**
29. **वाक्यपदीये ब्रह्मकाण्डे, पृ**. 174

**सन्दर्भग्रन्थ**-

1. **व्याकरणमहाभाष्यम्, व्याख्याकार:, आचार्यजयशङ्करलालत्रिपाठी**
2. **वाक्यपदीयम्, व्याख्याकार:, पण्डित रघुनाथशर्मा।**